শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমন্নিগমান্তমহাদেশিকৈঃ অনুগৃহীতা

# ॥ শ্রী গোপালৱিংশতিঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী গোপালৱিংশতিঃ ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

ৱন্দে বৃন্দাৱনচরং ৱল্লৱীজনৱল্লভম্।
জযন্তীসংভৱং ধাম ৱৈজযন্তীৱিভূষণম্॥ **1** ॥

ৱাচং নিজাঙ্করসিকাং প্রসমীক্ষমাণো
ৱক্ত্রারৱিন্দৱিনিৱেশিতপাঞ্চজন্যঃ।
ৱর্ণত্রিকোণরুচিরে ৱরপুণ্ডরীকে
বদ্ধাসনো জযতি ৱল্লৱচক্রৱর্তী॥ **2** ॥

আম্নাযগন্ধিরুদিতস্ফুরিতাধরোষ্ঠম্
আস্রাৱিলেক্ষণমনুক্ষণমন্দহাসম্।
গোপালডিম্ভৱপুষং কুহনাজনন্যাঃ
প্রাণস্তনন্ধযমৱৈমি পরং পুমাংসম্॥ **3** ॥

আৱির্ভৱৎৱনিভৃতাভরণং পুরস্তাৎ
আকুঞ্চিতৈকচরণং নিভৃতান্যপাদম্।
দধ্না নিমন্থমুখরেণ নিবদ্ধতালং
নাথস্য নন্দভৱনে নৱনীতনাট্যম্॥ **4** ॥

হর্তুং কুম্ভে ৱিনিহিতকরঃ স্ৱাদু হৈযঙ্গৱীনং
দৃষ্টৱা দামগ্রহণচটুলাং মাতরং জাতরোষাম্।
পাযাদীষৎ প্রচলিতপদো নাপগচ্ছন্ ন তিষ্ঠন্
মিথ্যাগোপঃ সপদি নযনে মীলযন্ ৱিশ্ৱগোপ্তা॥ **5** ॥

ৱ্রজযোষিদপাঙ্গৱেধনীযং
    মধুরাভাগ্যমনন্যভোগ্যমীডে।
ৱসুদেৱৱধূস্তনন্ধযং তৎ
    কিমপি ব্রহ্ম কিশোরভাৱদৃশ্যম্॥ **6** ॥

পরিৱর্তিতকন্ধরং ভযেন
    স্মিতফুল্লাধরপল্লৱং স্মরামি।
ৱিটপিৎৱনিরাসকং কযোশ্চিৎ
    ৱিপুলোলূখলকর্ষকং কুমারম্॥ **7** ॥

নিকটেষু নিশামযামি নিত্যং
    নিগমান্তৈরধুনাঽপি মৃগ্যমাণম্।
যমলার্জুনদৃষ্টবালকেলিং
    যমুনাসাক্ষিকযৌৱনং যুৱানম্॥ **8** ॥

পদৱীমদৱীযসীং ৱিমুক্তেঃ
    অটৱীসংপদমম্বুৱাহযন্তীম্।
অরুণাধরসাভিলাষৱংশাং
    করুণাং কারণমানুষীং ভজামি॥ **9** ॥

অনিমেষনিষেৱণীযমক্ষ্ণোঃ
    অজহদ্যৌৱনমাৱিরস্তু চিত্তে।
কলহাযিতকুন্তলং কলাপৈঃ
    করণোন্মাদকৱিভ্রমং মহো মে॥ **10** ॥

অনুযাযিমনোজ্ঞৱংশনালৈঃ
    অৱতু স্পর্শিতৱল্লৱীৱিমোহৈঃ।
অনঘস্মিতশীতলৈরসৌ মাম্
    অনুকম্পাসরিদম্বুজৈরপাঙ্গৈঃ॥ **11** ॥

অধরাহিতচারুৱংশনালাঃ
 মকুটালম্বিমযূরপিঞ্ছমালাঃ।
হরিনীলশিলাৱিভঙ্গনীলাঃ
 প্রতিভাঃ সন্তু মমান্তিমপ্রযাণে॥ **12**॥

অখিলানৱলোকযামি কালান্
 মহিলাধীনভুজান্তরস্য যূনঃ।
অভিলাষপদং ৱ্রজাঙ্গনানাম্
 অভিলাপক্রমদূরমাভিরূপ্যম্॥ **13**॥

হৃদি মুগ্ধশিখণ্ডমণ্ডনো
 লিখিতঃ কেন মমৈষ শিল্পিনা।
মদনাতুরৱল্লৱাঙ্গনা -
 ৱদনাম্ভোজদিৱাকরো যুৱা॥ **14**॥

মহসে মহিতায মৌলিনা
 ৱিনতেনাঞ্জলিমঞ্জনৎৱিষে।
কলযামি ৱিমুগ্ধৱল্লৱী -
 ৱলযাভাষিতমঞ্জুৱেণৱে॥ **15**॥

জযতি ললিতৱৃত্তিং শিক্ষিতো ৱল্লৱীনাং
 শিথিলৱলযশিঞ্জাশীতলৈর্হস্ততালৈঃ।
অখিলভুৱনরক্ষাগোপৱেষস্য ৱিষ্ণোঃ
 অধরমণিসুধাযামংশৱান্ ৱংশনালঃ॥ **16**॥

চিত্রাকল্পঃ শ্রৱসি কলযন্ লাঙ্গলীকর্ণপূরং
 বর্হোত্তংসস্ফুরিতচিকুরো বন্ধুজীৱং দধানঃ।
গুঞ্জাবদ্ধামুরসি ললিতাং ধারযন্ হারযষ্টিং
 গোপস্ত্রীণাং জযতি কিতৱঃ কোঽপি কৌমারহারী॥ **17**॥

লীলাযষ্টিং করকিসলযে দক্ষিণে ন্যস্য ধন্যাম্
অংসে দেৰ্ব্যাঃ পুলকরুচিরে সন্নিৰিষ্টান্যবাহুঃ।
মেঘশ্যামো জযতি ললিতো মেখলাদত্তৰেণুঃ
গুঞ্জাপীডস্ফুরিতচিকুরো গোপকন্যাভুজঙ্গঃ॥ **18**॥

প্রত্যালীঢস্থিতিমধিগতাং প্রাপ্তগাঢাঙ্কপালিং
পশ্চাদীষন্মিলিতনযনাং প্রেযসীং প্রেক্ষমাণঃ।
ভস্ত্রাযন্ত্রপ্রণিহিতকরো ভক্তজীৰাতুরৰ্ব্যাৎ
ৰারিক্রীডানিবিডৰসনো ৰল্লৰীৰল্লভো নঃ॥ **19**॥

ৰাসো হৃৎৰা দিনকরসুতাসন্নিধৌ ৰল্লৰীনাং
লীলাস্মেরো জযতি ললিতামাস্থিতঃ কুন্দশাখাম্।
সৰ্ব্রীডাভিস্তদনু ৰসনে তাভিরভ্যর্থ্যমানে
কামী কশ্চিৎ করকমলযোরঞ্জলিং যাচমানঃ॥ **20**॥

ইত্যনন্যমনসা ৰিনির্মিতাং
ৰেঙ্কটেশকৰিনা স্তুতিং পঠন্।
দিৰ্ব্যৰেণুরসিকং সমীক্ষতে
দৈৰতং কিমপি যৌৰতপ্রিযম্॥ **21**॥

॥ ইতি শ্রী গোপালৰিংশতিঃ সমাপ্তা॥

কৰিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৰেঙ্কটেশায ৰেদান্তগুরৰে নমঃ॥